International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 201-203
© 2017 IJSR
www.anantaajournal.com
Received: 04-09-2017
Accepted: 05-10-2017

**Dr. G Sireesha**
Assistant Professor,
Department of Sanskrit,
Sri Venkateswara University,
Tirupati, Andhra Pradesh, India

**Correspondence**
**Dr. G Sireesha**
Assistant Professor,
Department of Sanskrit,
Sri Venkateswara University,
Tirupati, Andhra Pradesh, India

# गैर्वाणीवैशिष्ट्यम्

**Dr. G Sireesha**

**शोधसङ्क्षिप्तिका**
संस्कृतं प्राचीनभाषाषु अन्यतमा। इयं सुरभाषा, देवभाषा इति कथ्यते। इयं सङ्गणयन्त्रभाषाभवितुमत्यन्तयोग्या च। तादृश्याः अस्याः भाषायाः विषयमधिकृत्य अत्र शोधप्रबन्धे - उपोद्घातः, संस्कृतशब्दव्युत्पत्तिः, सर्वप्राचीना भाषा संस्कृतम्, सङ्गणकभाषा संस्कृतम्, देवभाषा संस्कृतम्, व्यवहारभाषा संस्कृतम्, अस्याः व्याकरणवैशिष्ट्यम्, संस्कृतवाङ्मयव्याप्तिः - इत्येते विषयाः प्रतिपाद्यन्ते।

**कुञ्चिकापदानि:** गैर्वाणी, संस्कृतम्, देवभाषा, सङ्गणभाषा, वैशिष्ट्यम्, यास्कः, शङ्कराचार्यः, पाणिनिः, वेदः।

## उपोद्घात

संस्कृतं प्राचीनभाषाषु अन्यतमा। प्राचीनभाषासु च संस्कृतभाषायामेव अत्यन्तप्राचीनतमं साहित्यमुपलभ्यते। मेसपटोमिया-ईजिप्ट्-चैनादिदेशेषु संस्कृतिः यदा नाङ्कुरिता तस्मात्प्रागेव भारतदेशे विज्ञानमयाः अपौरुषेयाः वेदाः महर्षिणां दिव्यदृष्टितः आविर्भूताः। सुरभाषा, देवभाषा इति संस्कृतभाषायाः प्राचीने अभिधाने। अर्थात् सुरैः देवैः भाष्यमाणत्वात् इयं भाषा सुरभाषा, देवभाषा इति कथ्यते। पुराणेषु सुर-असुरभेदो दृश्यते। एते एव क्रमशः अदैत्याः - दैत्याः इति, देवाः - दानवाः (राक्षसाः) इत्यपि अभिधीयन्ते।
सुराः, देवाः, अदैत्याः मध्य-एसियातः प्रवासम् आगताः आर्यजातिसम्बन्धिनः भवन्तीति चरित्रकारैः अभिधीयते। किन्तु पुराणेषु सुर-असुरौ भ्रातरौ इति उक्तम्।

> भाषासु मुख्या मधुरा, दिव्या गीर्वाणभारती।
> तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम्।। इति संस्कृतं विद्वद्भिर्जेगीयते।
> ब्राह्मी तु भारतीभाषा गीर्वाग्वाणी सरस्वती। (अमरकोशः, शब्दवर्गः प्रथमश्लोकः/1.6.352)

इत्यमरकोशवचनाच्च गीः संस्कृतभाषा एव भवति। पाणिनेः पूर्वमेव रामायणे संस्कृतशब्दः भाषापदपर्यायत्वेन दृश्यते। वेदादारभ्य प्रयुक्तायाः भाषायाः संस्कृतभाषा इति, तत्र निर्मितरचनेभ्यः संस्कृतसाहित्यम् उत संस्कृतवाङ्मयमिति च अभिधानो दृश्यते।

**संस्कृतशब्दव्युत्पत्ति**

सं इत्युपसर्गपूर्वकात् डुकृञ्-करणे इत्यस्माद्धातोः क्त-प्रत्यये भूषणार्थे सुडागमे संस्कृतशब्दः निष्पन्नो भवतीति विदितचरमेव समेषाम्।

**सर्वप्राचीना भाषा संस्कृतम्**

इयं संस्कृतभाषा विश्वभाषा सर्वप्राचीना च। लोके2स्मिन् प्रेञ्च्, ग्रीक्, लाटिन्, रष्यन् इत्यादीनां भाषाणामपेक्षया संस्कृतस्यैव प्रचीनत्वं भाषाशास्त्रविदो2ङ्गीचक्रुः।

**सङ्गणकभाषा संस्कृतम्**

इयं भाषा सङ्गणकभाषा भवितुमत्यन्तयोग्यतमा। तत्र कारणञ्च प्रकृति-प्रत्ययादिसंस्कारविशेष एव। प्रकृति-प्रत्ययादिसंस्कृतत्वादेवास्याः संस्कृतम् इति व्यवहारस्समजनि।

**देवभाषा संस्कृतम्**

सेयं विद्वद्भिः व्यवह्रियमाणत्वात् देवभाषा इति नाम आगता। उक्तञ्च विद्वद्भिः - संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः इति।

**व्यवहारभाषा संस्कृतम्**

अपि च - भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती इति कथनात्, संस्कृतस्य भाषणाद् भाषा इत्यप्यभिधानो विद्यते। तद्यथा - रामायण-महाभारतयोः काले इयं संस्कृतभाषा जनसाधारणभाषा आसीत्। तत्रैव प्रमाणान्यपि दृश्यन्ते। तद्यथा

1. रामायणे - 1.इळ्वलो नामकः कश्चित् राक्षसः ब्राह्णरूपं धृत्वा ब्राह्मणान् संस्कृतभाषायामेव आमन्त्रयत्। 2.सीतान्वेषणप्रसङ्गे2शोकोपवनं प्रविश्य संस्कृतेनैव हनुमानपि सीतया व्यवहृतवान्। तद्यथा -
   यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम्।
   रावणं मन्यमाना मां सीता भीता भविष्यति।।
   इति।
2. यास्कः स्वनिरुक्ताख्यग्रन्थे वैदिकाद्भिन्नां भाषा नाम्ना व्यवहृतवान्। तदेव लौकिकं संस्कृतम्।
3. एवं संस्कृतं द्विप्रकारकं - 1. वैदिकम्, 2. लौकिकं चेति। अनयोरुभयोरपि महर्षिपाणिनिः अष्टाध्यायीनाम्ना व्याकरणं ग्रथितवान्।
4. क्रीस्तो पूर्वं द्वितीयशतके हिमवतः विन्ध्यपर्वतस्य मध्यदेशे व्यवहारभाषात्वेन संस्कृतभाषा आसीदिति डा. भाण्डारकरमहोदयो2ब्रवीत्।
5. व्याकरणभाष्ये2पि सारथिना कृतस्सूतविवादः दृश्यते।
6. संस्कृतस्य काव्यनाटकसाहित्यनिर्माणमपि सूचयति जनतायाः संस्कृतपरिज्ञानम्।
7. आदिशङ्कराचार्येण प्रश्ने कृते प्राकृतस्त्रियः (आटविकनार्यः) संस्कृतभाषायां समाधानं दत्तवन्तः। तद्यथा -

   स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरं गिरन्ति।
   द्वारस्थनीडान्तरसन्निरुद्धाः जानीहि तन्मण्डनपण्डितौकः।।

इत्यादिभिः प्रामाणैः अवगम्यते यत् - इयं संस्कृतभाषा पुरा व्यवहारभाषा आसीदिति।

**अस्याः व्याकरणवैशिष्ट्यम्**

एतादृशमहत्त्वपूर्णायाम् अस्यां भाषायां पदनिष्पत्तिः अतीव गम्भीरा युक्तियुक्ता च। स्वरेषु ह्रस्व-दीर्घ-प्लुताः इति त्रिधा, पुनः तत्र ह्रस्वस्वरः उदात्त-

अनुदात्त-स्वरिताः इति त्रिधा, पुनः ते च उदात्तादयः अनुनासिक-अननुनासिकभेदेन द्विधा भिद्यन्ते। एवमाहत्य एकः अकारः एव संस्कृतभाषायामस्याम् अष्टादशरूपाणि सन्तनोतीति अहो महदाश्चर्यम् ।

एवञ्चाहत्य तत्र केवलं स्वराक्षराण्येव 132 विधानि भवन्ति। तेषामुच्चारणव्यवस्थापि अत्यन्तनिगूढं तन्त्रं तत्त्वञ्चाविष्करोति।

**संस्कृतवाङ्मयव्याप्ति**

संस्कृतवाङ्मयं प्रधानतया 1. वेदवाङ्मयकालः, 2. स्मृतिवाङ्मयकालः, 3. लौकिकवाङ्मयकाल इति त्रिधा विभाजयितुं शक्नुमः।

तत्र - 1. भगवतः निःश्वासरूपेणोद्भूताः अपौरुषेयाः ऋक्-यजुस्सामाथर्वाख्याः चत्वारो वेदाः, तत्रैवान्तर्गतौ ब्राह्मण-आरण्यकभागौ, अन्तभागाः आध्यात्मिकज्ञानप्रबोधिकाः उपनिषदश्च अस्मिन् विभागकाले समागच्छन्ति।

2. शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषम्, कल्पः इत्याख्यानि षड्वेदाङ्गानि, पतञ्जलि-गौतम-काणाद-व्यासादिभिः विरचितानि सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसाख्यानि षट् दर्शनानि, आयुर्वेद-धनुर्वेद-गान्धर्ववेद-अर्थशास्त्राद्युपवेदाः, याज्ञवल्क्–पराशराख्याः स्मृतयः, अष्टादशपुराणानि, पुराण-न्याय-मीमांसा-धर्मशास्त्राख्या वेदस्योपाङ्गत्वेन अभिधीयमाना स्मृतिवाङ्मयकाले समाविशन्ति।

3. रामायण-महाभारताख्यौ इतिहासौ, शास्त्रग्रन्थाः काव्य-नाटकादीनि चेत्येते सर्वे ग्रन्थाः इमां गैर्वाण्यामेव विलसन्ति। भरतः स्वनाट्यशास्त्रे इत्थमभाणीत् -

> न तद् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
> न स योगो न तत्कर्म यन्नाट्ये2स्मिन् न दृश्यते।। (भरतनाट्यशास्त्रम्, 1.113)

वेदवाङ्मये प्रयुक्ता संस्कृतभाषा परस्मैपद-आत्मनेपदप्रयोगाः दरीदृश्यन्ते। किन्तु तादृशप्रयोगाः लौकिकवाङ्मये न तथा दृश्यन्ते।

**उपसंहार**

महम्मदीयानाम् आगमनात् प्राक् राजभाषात्वेन, साहित्यभाषात्वेन शिक्षितनागरिकाणां भाषात्वेन च विलसितं, आसेतुशीतनगपर्यन्तं च गौरवस्थानमलङ्कृतञ्च संस्कृतं समस्तभारतोपखण्डम् एकस्यां संस्कृतौ संस्थापयति। तदर्थमेव वयं सर्वे भारतीयाः भवामः। भारतीयान् सर्वान् एकसूत्रबद्धान् कर्तुम् अलमियमेकैव भाषा। तादृशशक्तिरस्यामेव विद्यते। संस्कृतभाषा न मृतभाषा। अपितु जीवद्भाषा। इदानीमपि अस्यां व्यवहरन्ति। रचनाः कुर्वन्ति च। बहुभाषाणां जननी, उपजीव्यभाषा च।

**आधारग्रन्था**


1. संस्कृतसाहित्यचरित्र (वैदिकवाङ्मयम् - लौकिकवाङ्मयम् - विमर्शनात्मकम्) - वेदालङ्कार - डा. मुडिगण्टि गोपालरेड्डी, डा. सुजाता रेड्डी, श्रीपोट्टिश्रीरामुलु तेलुगुविश्वविद्यालयः, हैदराबाद् - 500 004। प्रकाशितवर्षः - 2002. ISBN : 81-86073-100-8
2. निबन्धरत्नावलिः (Seminar/Conference Papers and Research Articles) - रचयिता - प्रो. के. हयग्रीवशर्मा । श्रीवेङ्कटेश्वरविश्वविद्यालयः, तिरुपति - 517 502. प्रकाशितवर्षः - 2009.
3. अमरकोशः - काण्ड-1, sanskritdocuments.org August 2, 2016.
4. The Natya Sastra – By Manmohan Ghosh, Vol. I, Published by - The Royal Asiatic Socity of Bengal – 1959.